(747) " तुप हिंसार्थः " (VI-तुदादिः-1309. सक. सेट्. पर.)

'शपि तोपति हिंसायां तत्रैव तुपतीति शे ॥' (श्लो. 138) इति देवः। तोपकः-पिका, तोपकः-पिका, तुतुपिषकः-तुतोपिषकः-षिका, तोतुपकः-पिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुचतिवत् (200) ज्ञेयानि। अस्य धातोः तुदादित्वात् शतरि—तुपन् इति रूपम्। स्त्रियां—तुपन्ती-तुपती इति रूपद्वयमिति विशेषः। क्तप्रत्यये 'उदुपधात्—' (1-2-21) इति कित्त्वविकल्पो न भवति, 'शब्विकरणेभ्यः एव इष्यते' इति भाष्यकारवचनात्। तेन तुपितः इत्येव।

(748) " तुफ हिंसार्थः " (I-भ्वादिः-408. सक. सेट्. पर.)

तोफकः-फिका, तोफकः-फिका, तुतुफिषकः-तुतोफिषकः-षिका, तोतुफकः-फिका; तोफिता-त्री, तोफयिता-त्री, तुतुफिषिता-तुतोफिषिता-त्री, तोतुफिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुचतिवत् (200) ज्ञेयानि। [A]प्रतोफितुम्।

(749) " तुफ हिंसार्थः " (VI-तुदादिः-1311. सक. सेट्. पर.)

तोफकः-फिका, तोफकः-फिका, तुतुफिषकः-तुतोफिषकः-षिका, तोतुफकः-फिका; तोफिता-त्री, तोफयिता-त्री, तुतुफिषिता-तुतोफिषिता-त्री, तोतुफिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि कुरधातुवत् (229) बोध्यानि।

(750) " तुबि अर्दने " (I-भ्वादिः-428. सक. सेट्. पर.)

'लुम्बयेत् तुम्बयेदर्दे शपि लुम्बति तुम्बति ॥' (श्लो. 139) इति देवः। तुम्बकः-म्बिका, तुम्बकः-म्बिका, तुतुम्बिषकः-षिका, तोतुम्बकः-म्बिका; तुम्बिता-त्री, तुम्बयिता-त्री, तुतुम्बिषिता-त्री, तोतुम्बिता-त्री; इत्यादीनि सर्वाण्यपि भौवादिककुठिधातुवत् (209) ज्ञेयानि। [B]सन्तुम्बितः।

---

A. 'अत्रुम्प्यधामानमिनं प्रतोफितुं प्रतुम्फशीलान् मिलतोऽथ राक्षसान्।' धा. का. 1. 53.

B. 'वियोगसन्तुम्बितकोकचुम्बिता सन्तापसृब्धाऽपि जगाद तद्वधूः।' धा.का. 1.56.